ಕರ್ನಾಟಕಸರ್ಕಾರ

ಶಾಲಾ ಶಿಕ್ಷಣ ಮತ್ತು ಸಾಕ್ಷರತಾ ಇಲಾಖೆ

ಪಾಠ ಆಧಾರಿತ ಮೌಲ್ಯಾಂಕನ ಸಾಮಗ್ರಿ

2025–26

ಪ್ರಥಮ ಭಾಷೆ – ಸಂಸ್ಕೃತ.

ಎಂಟನೆಯ ತರಗತಿ

8

ರಾಜ್ಯ ಶಿಕ್ಷಣ ಸಂಶೋಧನೆ ಮತ್ತು ತರಬೇತಿ ಇಲಾಖೆ

ಬನಶಂಕರಿ 3 ನೇ ಹಂತ, ಬೆಂಗಳೂರು – 560085.

ಮತ್ತು

ಜಿಲ್ಲಾ ಶಿಕ್ಷಣ ಮತ್ತು ತರಬೇತಿ ಸಂಸ್ಥೆ

ಬೆಂಗಳೂರು ನಗರ ಜಿಲ್ಲೆ,ರಾಜರಾಜೇಶ್ವರಿ ನಗರ– 560098

<table>
<tr><th colspan="2">ಪರಿಕಲ್ಪನೆ ಮತ್ತು ಮಾರ್ಗದರ್ಶನ</th></tr>
<tr><td colspan="2">**ಶ್ರೀಮತಿ ರಶ್ಮಿ ಮಹೇಶ್ V, ಭಾ.ಆ.ಸೇ**
ಸರ್ಕಾರದ ಪ್ರಧಾನ ಕಾರ್ಯದರ್ಶಿಗಳು
ಶಾಲಾ ಶಿಕ್ಷಣ ಮತ್ತು ಸಾಕ್ಷರತಾ ಇಲಾಖೆ</td></tr>
<tr><td>ಡಾ. ತ್ರಿಲೋಕ್ ಚಂದ್ರ **K V, ಭಾ.ಆ.ಸೇ**
ಆಯುಕ್ತರು, ಶಾಲಾ ಶಿಕ್ಷಣ ಇಲಾಖೆ
ಬೆಂಗಳೂರು.</td><td>ಶ್ರೀ ಗೊಪಾಲಕೃಷ್ಣ **H N,**
ನಿರ್ದೇಶಕರು
DSERT, ಬೆಂಗಳೂರು.</td></tr>
<tr><th colspan="2">ಡಯಟ್ ಸಹಕಾರ</th></tr>
<tr><td>ಶ್ರೀ ಶಿವಪ್ಪ
ಪ್ರಾಂಶುಪಾಲರು ಮತ್ತು ಉಪನಿರ್ದೇಶಕರು (ಅಭಿವೃದ್ಧಿ)
ಜಿಲ್ಲಾ ಶಿಕ್ಷಣ ಮತ್ತು ತರಬೇತಿ ಸಂಸ್ಥೆ,
ಬೆಂಗಳೂರು ನಗರ ಜಿಲ್ಲೆ, ರಾಜರಾಜೇಶ್ವರಿನಗರ,
ಬೆಂಗಳೂರು-560098</td><td>ಶ್ರೀ ಕೆ. ರಾಘವ ಹೊಳ್ಳ
ಉಪನ್ಯಾಸಕರು
ಜಿಲ್ಲಾ ಶಿಕ್ಷಣ ಮತ್ತು ತರಬೇತಿ ಸಂಸ್ಥೆ,
ಬೆಂಗಳೂರು ನಗರ ಜಿಲ್ಲೆ, ರಾಜರಾಜೇಶ್ವರಿನಗರ,
ಬೆಂಗಳೂರು-560098</td></tr>
<tr><th colspan="2">ಸಂಯೋಜನೆ</th></tr>
<tr><td colspan="2">ಶ್ರೀಮತಿ ರಾಧಾ **P**
ಹಿರಿಯ ಸಹಾಯಕ ನಿರ್ದೇಶಕರು,
DSERT, ಬೆಂಗಳೂರು</td></tr>
<tr><th colspan="2">ಮಾರ್ಗದರ್ಶಕರು ಹಾಗೂ ಪರಿಶೀಲನೆ</th></tr>
<tr><td colspan="2">ಡಾ. ವೆಂಕಟರಮಣ ದೇವರು ಭಟ್ಟ
ಸಂಸ್ಕೃತ ವಿಷಯ ಪರಿವೀಕ್ಷಕರು,
ಆಯುಕ್ತರ ಕಾರ್ಯಾಲಯ ಬೆಂಗಳೂರು-01</td></tr>
<tr><th colspan="2">ಪಾಠ ಆಧಾರಿತ ಮೌಲ್ಯಾಂಕನ ಸಾಮಗ್ರಿ ರಚನಾ ತಂಡ</th></tr>
<tr><td>ನಾರಾಯಣ ಟಿ. ಗಾಂವ್ಕರ್
ಎಂ.ಎಲ್.ಎ. ಪ್ರೌಢಶಾಲೆ,೧೫ನೇ ಅಡ್ಡರಸ್ತೆ,
ಮಲ್ಲೇಶ್ವರಂಬೆಂಗಳೂರು - ೦೩</td><td>ಶ್ರೀಹರಿ ಜೋಯಿಸ ಬಿ ಜಿ
ವಾಗ್ದೇವಿ ಆಂಗ್ಲಮಾಧ್ಯಮ ಪ್ರೌಢಶಾಲೆ,
ತೀರ್ಥಹಳ್ಳಿ ಶಿವಮೊಗ್ಗ</td></tr>
<tr><td>ನಾಗೇಂದ್ರ ಭಟ್ಟ
ಸಂತ ತೆರೆಸಾ ಬಾಲಕಿಯರ ಪ್ರೌಢಶಾಲೆ
ಚಾಮರಾಜಪೇಟೆ, ಬೆಂಗಳೂರು –18</td><td>ಗಣೇಶ ಭಟ್ಟ,
ಕರ್ನಾಟಕ ಪಬ್ಲಿಕ್ ಶಾಲೆ, ಸಾರಕ್ಕಿ,
ಜೆ.ಪಿ ನಗರ, ಬೆಂಗಳೂರು.</td></tr>
<tr><td>ಪ್ರಶಾಂತ ಬಿ. ಜಿ.
ಡಿ .ವಿ. ಎಸ್ ಸಂಯುಕ್ತ ಪದವಿ ಪೂರ್ವ ಕಾಲೇಜು,
ಪ್ರೌಢಶಾಲಾ ವಿಭಾಗ,ಶಿವಮೊಗ್ಗ.</td><td>ರಾಧಾಕೃಷ್ಣ ಭಟ್ಟ.
ಎ.ಎಸ್. ಎಂ ಪ್ರೌಢಶಾಲೆ,೧೮ ನೇ ಮುಖ್ಯ ರಸ್ತೆ,
೮ನೇ ಬ್ಲಾಕ್ ನಂದಿನಿ ಲೇಔಟ್. ಬೆಂಗಳೂರು.</td></tr>
<tr><td colspan="2">ಗಣಪತಿ ಭಟ್ಟ,
ಹಿಮಾಂಶು ಜ್ಯೋತಿ ಕಲಾಪೀಠ ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು</td></tr>
</table>

अनुक्रमणिका

क्र. सं	पाठस्य नाम	अधिगमफलम्	पृष्ठसङ्ख्या
		भागः –1	
1.	वर्णा:	वर्णमालायाः अक्षराणां रचनां ध्वनिं च ज्ञात्वा पठन्ति लिखन्ति च।	6
2.	दिनचर्या संख्या च	नित्यव्यवहारे संस्कृत भाषाप्रयोगं ज्ञात्वा सम्भाषणकौशलं संख्याज्ञानं प्राप्नुवन्ति ।	9
3.	सहवास:	पठितगद्य पद्य कथानां मौल्यं ज्ञात्वा स्वाभिप्रायप्रकटनं कुर्वन्ति। वर्तमानादिकालेषु वाक्यप्रयोगज्ञानं प्राप्नुवन्ति । संबद्धविविधविषयाणां ज्ञानं सम्भाषणद्वारा अधिगमः । अभिप्रायप्रकटनं | सम्भाषणे रुच्युत्पादनञ्च ।	12
4.	नीतिबोधः	संस्कृतसाहित्यसुभाषितज्ञानं प्राप्य व्यक्तित्वविकसनं प्राप्नुवन्ति । पदच्छेदपूर्वक अन्वयज्ञानं प्राप्य तात्पर्य लिखन्ति ।	17
5.	सुबन्ता:	संस्कृतशब्दरचनाव्यवस्थां, सुप् प्रत्ययानां योगद्वारा उत्पादित एकवचन द्विवचन– बहुवचन, सप्तविभक्तिपदानां ज्ञानं प्राप्य लेखने पठने भाषणे च उपयोगं कुर्वन्ति।	22
6.	आरोग्यभाग्यम्	पठितगद्य पद्य कथानां मौल्यं ज्ञात्वा स्वाभिप्रायप्रकटनं कुर्वन्ति। वर्तमानादिकालेषु वाक्यप्रयोगज्ञानं प्राप्नुवन्ति । संबद्धविविधविषयाणां ज्ञानं सम्भाषणद्वारा अधिगमः । अभिप्रायप्रकटनं | सम्भाषणे रुच्युत्पादनञ्च ।	25
7.	जीवनसाफल्यम्	संस्कृतसाहित्यसुभाषितज्ञानं प्राप्य व्यक्तित्वविकसनं प्राप्नुवन्ति । गति–यति–लय– भावपूर्णगायनद्वारा श्रवणद्वारा च शिशुगीतगायनानन्दं प्राप्नुवन्ति। सम्भाषणे लेखने च लङ्लकारप्रयोगं कर्तुं समर्थाः भवन्ति । पदच्छेदपूर्वक अन्वयज्ञानं प्राप्य तात्पर्य लिखन्ति ।	29
8.	पत्रलेखनम्	स्वजीवने परिसरे च सम्भावितानुभवान् स्वलेखनमुखेन प्रकटयन्ति । श्रुतं / लिखितं / विचारान् स्वशैल्या लिखितरूपेण प्रकटयन्ति ।	65
9.	तिङन्ता:	लट् लृट् , लोट् लङ्लकारयोः ज्ञानं प्राप्नुवन्ति । वाक्यप्रयोगं कुर्वन्ति	35

10.	चतुरः कालिदासः	पठितगद्य पद्य कथानां मील्यं ज्ञात्वा स्वाभिप्रायप्रकटनं कुर्वन्ति। वर्तमानादिकालेषु वाक्यप्रयोगज्ञानं प्राप्नुवन्ति । संबद्धविविधविषयाणां ज्ञानं सम्भाषणद्वारा अधिगमः । अभिप्रायप्रकटनं | सम्भाषणे रुच्युत्पादनञ्च ।	38
11.	भिक्षुकस्य स्वप्नः(पूरकपाठः)	पठितगद्य पद्य कथानां मील्यं ज्ञात्वा स्वाभिप्रायप्रकटनं कुर्वन्ति। वर्तमानादिकालेषु वाक्यप्रयोगज्ञानं प्राप्नुवन्ति । संबद्धविविधविषयाणां ज्ञानं सम्भाषणद्वारा अधिगमः । अभिप्रायप्रकटनं | सम्भाषणे रुच्युत्पादनञ्च ।	42
12.	अक्कमहादेवी (पूरकपाठः)	पठितगद्य पद्य कथानां मील्यं ज्ञात्वा स्वाभिप्रायप्रकटनं कुर्वन्ति। वर्तमानादिकालेषु वाक्यप्रयोगज्ञानं प्राप्नुवन्ति । संबद्धविविधविषयाणां ज्ञानं सम्भाषणद्वारा अधिगमः । अभिप्रायप्रकटनं | सम्भाषणे रुच्युत्पादनञ्च ।	46
		भागः –2	
13.	गुर्वष्टकम्	संस्कृतसाहित्यसुभाषितादिज्ञानं प्राप्य व्यक्तित्वविकसनं प्राप्नुवन्ति । पदच्छेदपूर्वक अन्वयज्ञानं प्राप्य तात्पर्य लिखन्ति ।	49
14.	सन्धिः	सन्धिज्ञानं प्राप्य पठने लेखने भाषणे च पदविभाग–संयोगज्ञानकीशलं प्राप्नुवन्ति ।	53
15.	दुराशाफलम्	पठितगद्य पद्य कथानां मील्यं ज्ञात्वा स्वाभिप्रायप्रकटनं कुर्वन्ति। वर्तमानादिकालेषु वाक्यप्रयोगज्ञानं प्राप्नुवन्ति । संबद्धविविधविषयाणां ज्ञानं सम्भाषणद्वारा अधिगमः । अभिप्रायप्रकटनं | सम्भाषणे रुच्युत्पादनञ्च ।	59
16.	सिद्धभूमिः सिद्धगङ्गा	पठितगद्य पद्य कथानां मील्यं ज्ञात्वा स्वाभिप्रायप्रकटनं कुर्वन्ति। वर्तमानादिकालेषु वाक्यप्रयोगज्ञानं प्राप्नुवन्ति । संबद्धविविधविषयाणां ज्ञानं सम्भाषणद्वारा अधिगमः । अभिप्रायप्रकटनं | सम्भाषणे रुच्युत्पादनञ्च ।	62
17.	अनुवादः	अनुवादकौशलं प्राप्य संस्कृतसरलवाक्यानि स्वभाषया अनुवदन्ति	68
18.	पण्डितभास्करः '	पठितगद्य पद्य कथानां मील्यं ज्ञात्वा स्वाभिप्रायप्रकटनं कुर्वन्ति। वर्तमानादिकालेषु वाक्यप्रयोगज्ञानं प्राप्नुवन्ति । संबद्धविविधविषयाणां ज्ञानं सम्भाषणद्वारा अधिगमः । अभिप्रायप्रकटनं | सम्भाषणे रुच्युत्पादनञ्च ।	72

19.	समासः	समासज्ञानं प्राप्य पठने लेखने भाषणे च पदविभाग–संयोगज्ञानकौशलं प्राप्नुवन्ति ।	76
20.	प्रबन्धः	स्वजीवने परिसरे च सम्भावितानुभवान् स्वलेखनमुखेन प्रकटयन्ति । श्रुतं / लिखितं / विचारान् स्वशैल्या लिखितरूपेण प्रकटयन्ति ।	79
21.	तपोवनाभिगमनम्	पठितगद्य पद्य कथानां मौल्यं ज्ञात्वा स्वाभिप्रायप्रकटनं कुर्वन्ति। वर्तमानादिकालेषु वाक्यप्रयोगज्ञानं प्राप्नुवन्ति । संबद्धविविधविषयाणां ज्ञानं सम्भाषणद्वारा अधिगमः । अभिप्रायप्रकटनं | सम्भाषणे रुच्युत्पादनञ्च ।	81
22.	प्रहेलिकाः	संस्कृतसाहित्यसुभाषितज्ञानं प्राप्य व्यक्तित्वविकसनं प्राप्नुवन्ति । पदच्छेदपूर्वक अन्वयज्ञानं प्राप्य तात्पर्य लिखन्ति ।	85
23.	एकलव्यस्य गुरुभक्तिः, (पूरकपाठः)	पठितगद्य पद्य कथानां मौल्यं ज्ञात्वा स्वाभिप्रायप्रकटनं कुर्वन्ति। वर्तमानादिकालेषु वाक्यप्रयोगज्ञानं प्राप्नुवन्ति । संबद्धविविधविषयाणां ज्ञानं सम्भाषणद्वारा अधिगमः । अभिप्रायप्रकटनं | सम्भाषणे रुच्युत्पादनञ्च ।	92
24.	परमकारुणिकः महर्षिः (पूरकपाठः)	पठितगद्य पद्य कथानां मौल्यं ज्ञात्वा स्वाभिप्रायप्रकटनं कुर्वन्ति। वर्तमानादिकालेषु वाक्यप्रयोगज्ञानं प्राप्नुवन्ति । संबद्धविविधविषयाणां ज्ञानं सम्भाषणद्वारा अधिगमः । अभिप्रायप्रकटनं | सम्भाषणे रुच्युत्पादनञ्च ।	88

1. वर्णाः

1. उद्दिष्टानुगुणं प्रामुख्यम्

व्याकरणम् वर्णाः	स्मरणम्	धारणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	17	11	0	0	28
अङ्काः	17	11	0	0	28

2. प्रश्नानुगुणप्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्काः
1	वस्तुनिष्ठः	10	10
2	अतिलघूत्तरम्	12	12
3	लघूत्तरम्	6	6
4	दीर्घोत्तरम्	0	0

3.प्रश्नस्तरः

स्तरः	प्रश्नाः	अङ्काः
सुलभः	20	20
साधारणः	8	8
कठिनः	0	0
आहत्य	28	28

1. वर्णाः

I. सूक्तम् उत्तरम् चित्वा क्रमाक्षरेण सह लिखत।

1. संस्कृतभाषायां एतावन्तः वर्णाः सन्ति । (स्म–सु)

   A) १३ **B)** २५ **C)** ४८ **D)** ८

2. संस्कृतभाषायां एतावन्तः स्वराः सन्ति । (स्म–सु)

   A) ५ **B)** १३ **C)** ८ **D)** १८

3. संस्कृतभाषायां एतावन्तः दीर्घस्वराः सन्ति । (स्म–सु)

   A) ९ **B)** ८ **C)** ११ **D)** १३

4. वर्णेषु एतावन्तः प्रकाराः सन्ति । (स्म–सु)

   A) चत्वारः **B)** पञ्च **C)** त्रयः **D)** दश

5. एतादृशाः वर्णाः स्वराः इति कथ्यन्ते । (स्म–सु)

   A) स्वतन्त्रतया उच्चार्यमाणाः **B)** परतन्त्रतया उच्चार्यमाणाः

   C) अनुच्चार्यमाणः **D)** उच्चैः उच्चार्यमाणः

6. एतावन्ति माहेश्वरसूत्राणि सन्ति । (स्म–सु)

   A) दश **B)** एकादश **C)** पञ्चदश **D)** चतुर्दश

7. एकेन व्यञ्जनेन सह एकः स्वरः सङ्गच्छते चेत् तत् एतद् भवति । (स्म–सु)

   A) अगणिताक्षरम् **B)** गुणिताक्षरम् **C)** संयुक्ताक्षरम् **D)** अर्धाक्षरम्

8. अनेकव्यञ्जनसंयोगाद् एतद् भवति । (स्म–सु)

   A) गुणिताक्षरम् **B)** अर्धाक्षरम् **C)** संयुक्ताक्षरम् **D)** पूर्णाक्षरम्

9. "ए" एषः एतादृशः स्वरः । (स्म–सा)

   A) दीर्घस्वरः **B)** ह्रस्वस्वरः **C)** उच्चस्वरः **D)** उदात्तस्वरः

10. "न" एतत् ईदृशं व्यञ्जनम् । (स्म–सा)

   A) महाप्राणम् **B)** कर्कशव्यञ्जनम् **C)** अवर्गीयव्यञ्जनम् **D)** अनुनासिकव्यञ्जनम्

II. एकवाक्येन उत्तरं लिखत–

11. संस्कृतभाषायां कति वर्णाः सन्ति ? (स्म–सु)

12. स्वराः के ? (स्म–सु)

13. अनुनासिकानि कानि ? (स्म–सु)

14. वर्गीयव्यञ्जनानि कति सन्ति ? (स्म–सु)

15. ह्रस्वस्वराः दीर्घस्वराः च के ? (स्म–सा)

16. गुणिताक्षरं नाम किम् ? (स्म–सा)

III. **वर्णानां संयोजनं कुरुत–**

17. र् + आ + म् + आ + ल् + अ + ण् + अ + म् = ... (धा–सा)

18. व् + र् + अ + ञ् + ज + अ + न् + आ + न् + इ = ...(धा–सा)

19. अ + य् + ओ + ग् + अ + व् + आ + ह् + औ = ...(धा–सु)

20. अ + व् + अ + र् + ग् + ई + य् + अः = ...(धा–सु)

21. अ + क् + ष् + अ + र् + अ + म् = ...(धा–सु)

IV. **अल्पप्राण–महाप्राणाक्षराणि पृथक् कुरुत**:

22. दत्ताक्षराणि : ध, ग, ज, ख, ट, थ, क, फ, झ, छ, य, स (स्म–सु)

- अल्पप्राणाः:...
- महाप्राणाः: ....

V. वर्णान् पृथक् कृत्वा लिखत:

23. बालकः = ... (धा–सु)

24. भवनम् = ...(धा–सु)

25. औषधम् = ...(धा–सु)

26. शकुन्तला = ...(धा–सा)

27. महाभारतम् = ...(धा–सु)

28. वासवदत्ता = ...(धा–सा)

2. दिनचर्या संख्या च

1.उद्दिष्टानुगुणं प्रामुख्यम् –

दिनचर्या संख्या च	स्मरणम्	ग्रहणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	15	07	03	0	25
अङ्काः	15	07	03	0	25

2.प्रश्नानुगुणं प्रामुख्यम् –

क्र.सं	प्रश्नायाः स्वरूपम्	अङ्काः	प्रश्नाः
01	वस्तुनिष्ठ	12	12
02	लघु उत्तराणि	12	12
	आहत्य	24	24

3.प्रश्नस्तरः

स्तरः	प्रश्नाः	अङ्काः
सुलभः	12	12
साधारणः	08	08
कठिनः	05	05
आहत्य	25	25

2. दिनचर्या संख्या च

I. चत्वारः विकल्पाः प्रदत्ताः तेषु सूक्तं विकल्पं चित्वा क्रमाक्षरेण सह लिखत।

1. दशरथस्य कति पुत्राः आसन्? (स्म–सु)

A. चत्वारः **B.** पञ्च **C.** षट् **D.** सप्त

2. चैत्रवैशाख मासयोः एष ऋतुः वर्तते । (स्म–सा)

A. शिशिरः **B.** ग्रीष्मः **C.** वसन्तः **D.** हेमन्तः

3. अद्य रविवासरः परश्वः ______ (स्म–सा)

A.सोमवासरः **B.** मङ्गलवासरः **C.** बुधवासरः **D.** गुरुवासरः

4. शुक्रवासरस्य अपरं नाम किम्? (ग्र–सु)

A. स्थिरवासरः **B.** भार्गववासरः **C.** बृहस्पतिवासरः **D.** सौम्ययवासरः

5. "1.00" अत्र समयः अक्षरेषु इदं भवति । (स्म–सु)

A. चतुर्वादनम् **B.** त्रिवादनम् **C.** द्विवादनम् **D.** एकवादनम्

6. "सपाद त्रिवादनम्" अत्र समयः अङ्केषु इदम् भवति । (स्म–सु)

A. 1.15 **B.** 2.15 **C.** 3.15 **D.** 4.15

7. त्रयोदश, चतुर्दश, पञ्चदश, _____, सप्तदश । रिक्तस्थानं पूरयत । (स्म–सु)

A. षोडश **B.** अष्टादश **C.** नवदश **D.** विंशतिः

8. "दिनचर्या सङ्ख्या च" अस्मिन् पाठे शङ्करः कदा दन्तधावनं करोति ? (स्म–सु)

A. 6.45 **B.** 6.30 **C.** 6.15 **D.** 6.10

9. अद्य आदित्यवासरः प्रपरह्यः ______ वासरः । (स्म–सा)

A. गुरुवासरः **B.** शुक्रवासरः **C.** शनिवासरः **D.** रविवासरः

10. दशरथस्त कति भार्याः आसन् ? (ग्र–सु)

A. एका **B.** द्वे **C.** तिस्रः **D.** चतस्रः

11. कति विभक्तयः सन्ति ? (स्म–सु)

A. पञ्च **B.** षट् **C.** सप्त **D.** अष्ट

12. मानवस्य _ _ _ _ नेत्रे । (स्म–सु)

A. 03 **B.** 04 **C.** 01 **D.** 02

II. संयोज्य लिखत।

13. 7.30 – विंशत्यधिक एकवादनम् । (ग्र–क)

14. 11.45 – दशोन एकवदनम् । (ग्र–क)

15. 10.50 – पादोन द्वादशवादनम् । (ग्र–क)

16. 1.20 – सार्ध सप्तवादनम् । (ग्र–क)

17. 20 – षष्ठिः । (स्म–सा)

18. 30 – पञ्चाशत् । (स्म–सा)

19. 40 – त्रिंशत् । (स्म–सा)

20. 50 – चात्वारिंशत् । (स्म–सा)

21. 60 – विंशतिः । (स्म–सा)

III. पदानि अन्विष्य लिखत ।

22. _ _ _ _ _ बालकौ । (अ–सु)

23. _ _ _ _ _ _ विद्यालयः । (अ–सु)

24. _ _ _ _ _ _ फलानि । (अ–सु)

25. _ _ _ _ _ _ मासाः (ग्र–क)

(एकः, त्रीणि, द्वौ, चत्वारि , द्वादश)

3. सहवासः

3. उद्दिष्टानुगुणं प्रामुख्यम्

गद्यपाठः सहवासः	स्मरणम्	धारणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	39	13	1	0	53
अङ्काः	39	13	3	0	55

4. प्रश्नानुगुणप्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्काः
1	वस्तुनिष्ठः	16	16
2	अतिलघूत्तरम्	36	36
3	लघूत्तरम्	1	3
4	दीर्घोत्तरम्	0	0

3.प्रश्नस्तरः

स्तरः	प्रश्नाः	अङ्काः
सुलभः	23	23
साधारणः	22	24
कठिनः	8	8
आहत्य	53	55

I. सूक्तम् उत्तरम् चित्वा क्रमाक्षरेण सह लिखत।

1. चोरः चौर्यार्थं अत्र प्रविशति । (स्म–सु)

A) ऋष्याश्रमम् B) भिक्षुकगृहम् C) राजभवनम् D) नगरम्

2. ऋष्याश्रमे एषः ऋषिकुमारः इव आचरति। (स्म–सु)

A) राजा B) चोरः C) पण्डितः D) धनिकः

3. राजा एतान् परिशीलयति । (स्म–सु)

A) राजपुत्रान् B) मन्त्रिणः C) ऋषिकुमारान् D) प्रजाः

4. चोरः ऋषिकुमाराणां सहवासेन एतत् प्राप्तवान् । (धा–सु)

A) धनम् B) राज्यम् C) धनस्य नाशम् D) विवेकम्

5. "अस्ति" अस्य विरुद्धार्थकपदम् इदम् भवति । (स्म–सु)

A) भविष्यति B) अपठत् C) करोति D) नास्ति

6. "शीघ्रम्" इत्यस्य विरुद्धार्थकपदं इदम् अस्ति । (स्म–सा)

A) मन्दम् B) अनन्तरम् C) मुहूर्तम् D) सदा

7. "सरलम्" इत्यस्य विरुद्धार्थकपदं इदम् भवति । (स्म–सा)

A) सुन्दरः B) उत्तमः C) कठिनम् D) प्रसिद्धम्

8. "योग्याः" इत्यस्य विरुद्धार्थकपदम् एतद् भवति । (स्म–सा)

A) भोग्याः B) रुग्णाः C) योगिनी D) अयोग्याः

9. "चोरः" इत्यस्य समानार्थकपदम् भवति । (स्म–सा)

A) स्तेनः B) ऋषिः C) नापितः D) राजा

10. "भवनम्" इत्यस्य समानार्थकपदं भवति । (स्म–सा)

A) वनम् B) गृहम् C) स्थानम् D) आश्रमः

11. "कालः" इत्यस्य समानार्थकपदं अस्ति । (स्म–सा)

A) समयः B) जीवनम् C) व्याधिः D) वायुः

12. "शीघ्रम्" इत्यस्य समानार्थकपदम् इदमस्ति । (स्म–सा)

A) नित्यं B) सदा C) त्वरितम् D) कदाचित्

13. "सुन्दरः" इत्यस्य अन्यलिङ्गपदं इदम् । (स्म–सा)

A) सुन्दरा B) सुन्दरम् C) सुन्दरे D) सुन्दरी

14. "कुमारः" इत्यस्य अन्यलिङ्गपदम् इदम् अस्ति । (स्म–सा)

A) कुमारा B) कुमाणि C) कुमारी D) कुमारि

15. "पुत्री" इत्यस्य अन्यलिङ्गपदम् एतद् भवति । (स्म–सा)

A) पुत्रा B) पुत्रः C) पुत्रम् D) पुत्रौ

16. "संजातः" इत्यस्य अन्यलिङ्गपदम् इदम् । (स्म–सा)

A) संजाता B) संजाते C) संजाताः D) संजातम्

II. **एकवाक्येन उत्तरं लिखत।**

17. चोरः चौर्यार्थं कुत्र प्रविशति ? (धा–सु)

18. ऋष्याश्रमे कः ऋषिकुमारः इव आचरति? (धा–सु)

19. राजा कान् परिशीलयति ? (धा–सु)

20. चोरः ऋषिकुमाराणां सहवासेन किं प्रापद्वान् ? (धा–सा)

III. **रिक्तस्थानानि पूरयत।**

21. पुत्र्याः निमित्तं .... अन्वेषणं करोमि। (धा–सा)

22. इदानीं मम .... कार्याणि सन्ति। (धा–सु)

23. मम पुत्र्याः एषः एव .... भवतु।(धा–सु)

24. अतः इदानीम् अहं .... न इच्छामि। (धा–सु)

IV. विरुद्धार्थकपदानि लिखत।

25. अस्ति (स्म–सु)

26. शीघ्रम् (स्म–सु)

27. सरलम् (स्म–सु)

28. योग्याः (स्म–सु)

V. **समानार्थकपदानि लिखत।**

29. चोरः (स्म–सा)

30. भवनम् (स्म–सा)

31. कालः (स्म–सा)

32. शीघ्रम् (स्म–सा)

VI. **संयोजयत।**

अ	आ
33. राजभवनम्	करोति (स्म–सु)
34. वार्तालापम्	प्रविशति (स्म–सु)
35. धनम्	परिशीलयति (स्म–सु)
36. ऋषिकुमारान्	प्राप्नोति (स्म–सु)

VII. **प्रश्ननिर्माणं कुरुत। (रेखाङ्कितपदानि अवलम्ब्य)**

37. चौर्यकरणं चोरस्य कार्यम्। (स्म–क)

38. आश्रमे योग्याः ऋषिकुमाराः निवसन्ति। (स्म–क)

39. चोरः नदीजलेन स्नानं करोति। (स्म–क)

40. चोरः ऋषिकुमाराणां सहवासेन विवेकं प्राप्तवान्। (स्म–क)

VIII. **वाक्यशुद्धिं कुरुत**

41. चोरः चौर्यार्थं राजभवनं प्रविशन्ति। (स्म–क)

42. तादृशाः वरः कुत्र सन्ति। (स्म–क)

43. अहम् अपि द्रष्टुम् इच्छति। (स्म–क)

44. महाराजः सर्वान् अपि ऋषिकुमारः परिशीलयति। (स्म–क)

IX. **अन्यलिङ्गपदं लिखत।**

45. सुन्दरः (स्म–सा)

46. कुमारः (स्म–सा)

47. पुत्री (स्म–सा)

48. संजातः (स्म–सा)

X. आम् / न इति लिखत।

49. चोरः चौर्यार्थं दरिद्रगृहं प्रविशति। (धा–सु)

50. पुत्र्याः निमित्तं योग्यवरस्य अन्वेषणं करोमि। (धा–सु)

51. चोरः ऋषिकुमारः इव न आचरति। (धा–सु)

52. ऋषिकुमाराणां सहवासेन चोरः विवेकं प्राप्तवान्। (धा–सु)

XI. पञ्चषैः वाक्यैः उत्तरं संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा लिखत।

53. चोरस्य मनसः परिवर्तनं कथम् अभवत्? (अ–सा)

4. नीतिबोधः।

5. उद्दिष्टानुगुणं प्रामुख्यम्

पद्यपाठः नीतिबोधः	स्मरणम्	धारणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	37	10	1	0	48
अङ्काः	49	10	3	0	62

6. प्रश्नानुगुणप्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्काः
1	वस्तुनिष्ठः	13	13
2	अतिलघूत्तरम्	30	30
3	लघूत्तरम्	1	3
4	दीर्घोत्तरम्	4	16

3.प्रश्नस्तरः

स्तरः	प्रश्नाः	अङ्काः
सुलभः	24	24
साधारणः	19	21
कठिनः	5	17
आहत्य	48	62

4. नीतिबोधः।

I. सूक्तम् उत्तरम् चित्वा क्रमाक्षरेण सह लिखत।

1. "नाशम्" इति पदस्य शुद्धं लिङ्गं, विभक्तिं, वचनं च चिनुत । (स्म–सा)

A) पुंल्लिङ्गम्, प्रथमा, एकवचनम् B) स्त्रीलिङ्गम्, द्वितीया, बहुवचनम्

C) पुंलिङ्गम्, द्वितीया, एकवचनम् D) नपुंसकलिङ्गम्, सप्तमी, द्विवचनम्

2. "विनोदेन" इति पदस्य सम्यक् लिङ्गं, विभक्तिं, वचनं च चिनुत । (स्म–सा)

A) स्त्रीलिङ्गम्, प्रथमा, एकवचनम् B) पुंल्लिङ्गम्, तृतीया, एकवचनम्

C) नपुंसकलिङ्गम्, चतुर्थी, द्विवचनम् D) पुंल्लिङ्गम्, पञ्चमी, बहुवचनम्

3. "निद्रया" इति पदस्य उचितं लिङ्गं, विभक्तिं, वचनं च चिनुत । (स्म–सा)

A) स्त्रीलिङ्गम्, तृतीया, एकवचनम् B) नपुंसकलिङ्गम्, द्वितीया, द्विवचनम्

C) पुंल्लिङ्गम्, षष्ठी, बहुवचनम् D) स्त्रीलिङ्गम्, प्रथमा, बहुवचनम्

4. "भक्ताय" इति पदस्य समीचीनं लिङ्गं, विभक्तिं, वचनं च चिनुत । (स्म–सा)

A) नपुंसकलिङ्गम्, सप्तमी, एकवचनम् B) पुंल्लिङ्गम्, चतुर्थी, एकवचनम्

C) स्त्रीलिङ्गम्, प्रथमा, बहुवचनम् D) पुंल्लिङ्गम्, तृतीया, द्विवचनम्

5. "अपमानः" इति पदस्य विरुद्धार्थकं पदं चिनुत । (स्म–सा)

A) अनादरः B) तिरस्कारः C) सम्मानः D) अवमानः

6. "मित्रम्" इति पदस्य समीचीनं विरुद्धार्थकं पदं चिनुत । (स्म–सु)

A) सखा B) सुहृद् C) बन्धुः D) शत्रुः

7. "कृष्णः" इति पदस्य विरुद्धार्थकं पदं चिनुत । (स्म–सु)

A) श्यामः B) श्वेतः C) तमः D) नीलः

8. "काकः" इति पदस्य पर्यायपदं चिनुत । (स्म–सु)

A) पिकः B) वायसः C) हंसः D) शुकः

9. "मतिः" इति पदस्य समीचीनं पर्यायपदं चिनुत । (स्म–सु)

A) मनः B) हृदयम् C) चित्तम् D) बुद्धिः

10. "मित्रम्" इति पदस्य पर्यायपदं चिनुत । (स्म–सु)

A) सखा B) रिपुः C) शत्रुः D) वैरी

11. "नरः" इति पदस्य समीचीनं पर्यायपदं चिनुत । (स्म–सु)

A) नारी B) मानवः C) पशुः D) देवः

12. "दरिद्रः" इति पुंल्लिङ्गपदस्य स्त्रीलिङ्गं रूपं चिनुत । (स्म–सु)

A) दारिद्र्यम् B) दरिद्रत्वम् C) दरिद्रा D) दरिद्रम्

13. "माता" इति स्त्रीलिङ्गपदस्य पुंल्लिङ्गं रूपं चिनुत । (स्म–सु)

A) पिता B) मातृ C) मातृत्वम् D) मातरौ

II. एकवाक्येन उत्तरं लिखत।

14. पिककाकयोः भेदः कदा ज्ञायते? (धा–सु)

15. अपमानं कः न प्रकाशयेत्? (धा–सु)

16. नरस्य आभरणं किम्? (धा–सु)

III. लिङ्ग–विभक्ति–वचनानि लिखत

17. नाशम् (स्म–सा)

18. विनोदेन (स्म–सा)

19. निद्रया (स्म–सा)

20. भक्ताय (स्म–सा)

IV. रेखाङ्कितपदानां प्रश्ननिर्माणं कुरुत

21. पिककाकयोः वर्णः कृष्णः अस्ति। (स्म–सा)

22. काव्यशास्त्रविनोदेन धीमतां कालः गच्छति। (स्म–सा)

23. रूपस्य आभरणं गुणः। (स्म–सा)

V. विरुद्धार्थकपदानि लिखत

24. अपमानः (स्म–सु)

25. मित्रम् (स्म–सु)

26. कृष्णः (स्म–सु)

VI. **पर्यायपदानि लिखत**

27. काकः (स्म–सु)

28. मतिः (स्म–सु)

29. मित्रम् (स्म–सु)

30. नरः (स्म–सु)

VII. **संयोजयत**

अ	आ
31. गृहे	मूर्खाणां कालः गच्छति (धा–सा)
32. विनोदेन	ज्ञानस्याभरणम् (धा–सा)
33. कलहेन	दुश्चरितानि न प्रकाशनीयानि (धा–सा)
34. क्षमा	धीमतां कालः गच्छति (धा–सा)

VIII. चतुर्थं पदं लिखत।

35. गच्छति – आगच्छति। नयति ....। (स्म–सु)

36. काकः – प्रथमाविभक्तिः। गृहे ....। (स्म–सु)

37. कलहेन – तृतीयाविभक्तिः। वेदात् ....। (स्म–सु)

38. मानम् – अपमानम्। अस्ति ....। (स्म–सु)

IX. समूहेतरपदं चिनुत

39. दरिद्राय, निद्रया, रामाय, श्रोत्रियाय। (धा–क)

40. काकः, पिकः, गृहे, कृष्णः। (धा–सा)

41. मतिमान्, अर्थनाशम्, मनस्तापम्, अपमानम्। (धा–सा)

X. अन्यलिङ्गरूपं लिखत

42. दरिद्रः (स्म–सु)

43. माता (स्म–सु)

XI. संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा पञ्चभिः वाक्यैः उत्तरं लिखत।

44. धीमतां मूर्खाणां च कालः कथं गच्छति? (अ–सा)

XII. **श्लोकं पूरयत**

45. काकः ________________________। (स्म–क)

______________________ पिकः पिकः॥

46. अर्थनाशं _____________________। (स्म–क)

______________________ प्रकाशयेत्॥

47. काव्यशास्त्र_____________________। (स्म–क)

________________________कलहेन वा॥

48. नरस्याभरणं _____________________। (स्म–क)

___________________________ क्षमा॥

5. सुबन्ताः

7. उद्दिष्टानुगुणं प्रामुख्यम्

व्याकरणम् वर्णाः	स्मरणम्	धारणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	25	0	0	0	25
अङ्काः	25	0	0	0	25

8. प्रश्नानुगुणप्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्काः
1	वस्तुनिष्ठः	19	19
2	अतिलघूत्तरम्	6	6
3	लघूत्तरम्	0	0
4	दीर्घोत्तरम्	0	0

3.प्रश्नस्तरः

स्तरः	प्रश्नाः	अङ्काः
सुलभः	16	16
साधारणः	9	9
कठिनः	0	0
आहत्य	25	25

I. **सूक्तम् उत्तरं चित्वा लिखत**

1. "पदम्" इत्यस्य परिभाषा एषा (स्म–सु)

A) अक्षरसमूहः **B**) अर्थबोधकः वर्णसमूहः **C**) केवलं धातुः **D**) केवलं प्रत्ययः

2. "सुबन्तम्" एतद् भवति (स्म–सु)

A) क्रियापदम् **B**) नामपदम् **C**) अव्ययम् **D**) उपसर्गः

3. "राम" शब्दस्य प्रथमाविभक्तेः द्विवचनं इदम् (स्म–सु)

A) रामः **B**) रामौ **C**) रामाः **D**) रामम्

4. "कला" शब्दस्य प्रथमाविभक्तेः बहुवचनं इदम् (स्म–सु)

A) कला **B**) कले **C**) कलाः **D**) कलाम्

5. "वन" शब्दस्य द्वितीयाविभक्तेः एकवचनम् इदम् (स्म–सु)

A) वने **B**) वनानि **C**) वनम् **D**) वनेन

6. "हरि" शब्दस्य तृतीयाविभक्तेः एकवचनं एतत् (स्म–सु)

A) हरिणा **B**) हरिभ्याम् **C**) हरिभिः **D**) हरये

7. "मति" शब्दस्य चतुर्थीविभक्तेः एकवचनं इदम् (स्म–सु)

A) मत्या **B**) मत्यै (मतये अपि) **C**) मतिभ्याम् **D**) मतिभ्यः

8. "गुरु" शब्दस्य पञ्चमीविभक्तेः द्विवचनं इदम् (स्म–सु)

A) गुरोः **B**) गुरुभ्याम् **C**) गुरुभ्यः **D**) गुरौ

9. "धेनु" शब्दस्य षष्ठीविभक्तेः एकवचनम् इदम् (स्म–सु)

A) धेनोः **B**) धेन्वाः **C**) धेन्वाः/धेनोः **D**) धेनूनाम्

10. "तत्" (पुंलिङ्ग) शब्दस्य प्रथमाविभक्तेः एकवचनम् इदम् (स्म–सा)

A) तत् **B**) सः **C**) ते **D**) तौ

11. "तत्" (स्त्रीलिङ्ग) शब्दस्य द्वितीयाविभक्तेः बहुवचनम् इदम् (स्म–सा)

A) सा **B**) ते **C**) ताः **D**) ताम्

12. "तत्" (नपुंसकलिङ्ग) शब्दस्य सप्तमीविभक्तेः एकवचनम् इदम् (स्म–सु)

A) तत् **B**) तस्मिन् **C**) तस्मात् **D**) तस्य

13. "किम्" (पुंलिङ्ग) शब्दस्य तृतीयाविभक्तेः बहुवचनम् इदम् (स्म–सु)

A) के **B**) कैः **C**) कम् **D**) कयोः

14. "किम्" (स्त्रीलिङ्ग) शब्दस्य पञ्चमीविभक्तेः एकवचनम् इदम् (स्म–सु)

A) कस्याः **B**) कया **C**) कस्यै **D**) कस्मिन्

15. "किम्" (नपुंसकलिङ्ग) शब्दस्य प्रथमाविभक्तेः बहुवचनम् इदम् (स्म–सु)

A) के **B**) कानि **C**) किम् **D**) कः

16. "अस्मद्" शब्दस्य द्वितीयाविभक्तेः एकवचनम् इदम् (स्म–सु)

A) अहम् **B**) माम् **(**मा अपि) **C**) मया **D**) मम

17. "युष्मद्" शब्दस्य तृतीयाविभक्तेः द्विवचनम् इदम् (स्म–सा)

A) त्वया **B**) युवाभ्याम् **C**) युष्माभिः **D**) युष्मभ्यम्

18. "वन" शब्दस्य सप्तमीविभक्तेः एकवचनं इदम् (स्म–सु)

A) वने **B**) वनयोः **C**) वनेषु **D**) वनानि

19. "हरि" शब्दस्य सप्तमीविभक्तेः एकवचनं इदम् (स्म–सु)

A) हरौ **B**) हरी **C**) हरयः **D**) हरिणा

II. अन्यवचनं लिखत।

20. रामाय .... (स्म–सा)

21. वने .... (स्म–सा)

22. .... कलाः (स्म–सा)

23. .... हरी .... (स्म–सा)

24. ....यूयम् (स्म–सा) **25** तेन .... (स्म–सा)

6. आरोग्यभाग्यम्

1. उद्दिष्टानुगुणं प्रामुख्यम् –

. उद्दिष्टानि	स्मरणम्	ग्रहणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	23	05	06	0	34
अङ्काः	23	05	08	0	36

2. प्रश्नानुगुणं प्रामुख्यम् –

क्र.सं	प्रश्नायाः स्वरूपम्	अङ्काः	प्रश्नाः
01	वस्तुनिष्ठ	16	18
02	लघूत्तराणि	14	14
03	दीर्घोत्तराणि(03 अङ्काः)	06	02
	आहत्य	36	34

3.प्रश्नस्तरः

स्तरः	प्रश्नाः	अङ्काः
सुलभः	18	18
साधारणः	08	08
कठिनः	08	10
आहत्य	34	36

I. चत्वारः विकल्पाः प्रदत्ताः तेषु सूक्तं विकल्पं चित्वा क्रमाक्षरेण सह लिखत।

1. आरोग्यभाग्यम् इति पाठे उल्लिखितः कक्षानायकः एषः । (स्म–सु)

   A. गुणेशः **B.** रमेशः **C.** गिरीशः **D.** गणेशः

2. "अनुपस्थितः" अस्य विरुद्धार्थकपदम् इदम् अस्ति । (स्म–सु)

   A. न उपस्थितः **B.** विनुपस्थितः **C.** उपस्थितः **D.** किमुपस्थितः

3. "स्वीकरणेन" अत्र एषा विभक्तिः वर्तते । (स्म–सु)

   A. प्रथमा **B.** द्वितीया **C.** तृतीया **D.** चतुर्थी

4. भोजनान्ते ___ सेवनं करणीयम् । (स्म–सु)

   A. चक्र **B.** तक्र **C.** शक्र **D.** मिश्र

5. इदं सुराणां हिताय भवति । (स्म–सु)

   A. अमृतम् **B.** विषः **C.** सङ्गीतम् **D.** यक्षगानम्

6. नराणां हिताय किमस्ति ? (स्म–सु)

   A. धनम् **B.** अमृतम् **C.** तक्रम् **D.** वाहनम्

7. शरीरमाद्यं खलु ______ । (स्म–सु)

   A. भोगनसाधनम् **B.** क्रीडासाधनम् **C.** अधर्मसाधनम् **D.** धर्मसाधनम्

8. मानसिक आरोग्यं केन भवति ? (स्म–सु)

   A. मन्त्राभ्यासेन **B.** योगाभ्यासेन **C.** क्रीडाभ्यासेन **D.** तन्त्राभ्यासेन

9. लोकाः समस्ताः _____ भवन्तु । (स्म–सु)

   A. सुखिनो **B.** दुःखिनो **C.** धर्मिणो **D.** अधर्मिणो

10. अत्र समूहेतरपदम् इदमस्ति । (स्म–सा)

    A. भवति **B.** आसीत् **C.** अस्ति **D.** प्रविशति

11. अत्र समूहेतरपदम् इदमस्ति । (स्म–सा)

    A. सूर्यः **B.** पण्डितः **C.** ह्यः **D.** आचार्यः

12. अत्र समूहेतरपदम् इदमस्ति । (स्म–सा)

A. श्रद्धाम् **B.** बुद्धिम् **C.** ज्ञानम् **D.** विद्याम्

II. एकवाक्येन संस्कृतभाषया उत्तरं लिखत।

13. आरोग्यं कस्मादिच्छेत् ? (स्म–सु)

14. रमेशः किमर्थम् अनुपस्थितः? (स्म–सु)

15. केन आरोग्यस्य रक्षणं भवति ? (स्म–सु)

16. तक्रं केषां हिताय भवति ? (स्म–सु)

III. वाक्ये योजयत।

17. अहम् (अभि–सा) 18. अस्माकम् (अभि–सा)

19. सर्वदा (अभि–सा) 20. प्रतिदिनम् (अभि–सा)

IV. विरुद्धार्थकपं लिखत।

21. गमनम् (ग्र–सु)

22. अस्वास्थ्यम् (ग्र–सु)

23. अमृतम (ग्र–सु)

24. अधिकम् (ग्र–सु)

25. बहिः (ग्र–सु)

V. रिक्तस्थानं पूरयत।

26. नहि _ _ _ _ _ _ भेषजानां शतैरपि । (स्म–सा)

VI. चतुर्थपदं लिखत।

27. अहम्:पठामि::वयम्:_ _ _ _ _ (स्म–क)

28. त्वं:वदसि::यूयम्:_ _ _ _ _ _ (स्म–क)

29. फलम्:अस्ति::फलानि:_ _ _ _ _ (स्म–क)

30. विद्यालयस्य::षष्ठीविभक्तिः::दूरात्:_ _ _ _ _ (स्म–क)

31. अहम्:पठामि::त्वम्:______ (स्म–क)

32. यूयम्:पठथ::वयम्:_____ (स्म–क)

VII. यथानिर्देशं लिखत ।

33. सूर्यनमस्कारकरणेन स्वास्थ्यस्य रक्षणं भवति किम्? (अभि–क)

कः पाठः? का वदति? कं पृच्छति?

34. मानसिक आरोग्यं योगाभ्यासेन जायते। (अभि–क)

कः पाठः? कः वदति? कान् वदति?

7. जीवनसाफल्यम्

उद्दिष्टानुसारं प्राधान्यम्

उद्दिष्टम्	स्मरणम्	ग्रहणम्	अभिव्यक्तिः	प्रशंसा
प्रश्नसंख्या	30	24	4	–
अङ्काः	30	26	12	–

प्रश्नानुसारं प्राधान्यम्

क्रमांकः	प्रश्नस्वरूपम्	अङ्काः	प्रश्नसंख्या
१	वस्तुनिष्ठप्रश्नाः	27	27
२	लघु उत्तरम् – १ (१ अङ्कस्य प्रश्नाः)	26	26
३	लघु उत्तरम् – २ (२ अङ्कयोः प्रश्नाः)	–	–
४	दीर्घ उत्तरम् – १ (३ अङ्कानाम् प्रश्नः)	15	5

7. जीवनसाफल्यम्

I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पा: प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।

1. अस्मिन् भारतदेशे ग्रामो ग्रामः ....।(स्मरणम्–सुलभम्)

A) उपवनम् B) वनराजः C) सिद्धवनम् D) निर्जनवनम्

2. अत्र भारतदेशे बालाः एतादृशाः।(स्मरणम्–सुलभम्)

A) साधारणाः B) दास्यः C) देवीस्वरूपाः D) सेविकाः

3. बालकाः सर्वे .... ।(स्मरणम्–सुलभम्)

A) लक्ष्मणाः B) हनूमन्तः C) श्रीरामाः D) भरताः

4. हरिमन्दिरम् .... भवति।(स्मरणम्–सुलभम्)

A) देवालयः B) ग्रामः C) अखिलशरीरम् D) गृहः

5. अत्र धनशक्तिः एतस्यै प्रयुज्यते।(स्मरणम्–सुलभम्)

A) स्वार्थाय B) भोगाय C) जनसेवायै D) व्यापाराय

6. वनराजः अस्यै उपयुक्तः।(स्मरणम्–सुलभम्)

A) विक्रयाय B) क्रीडायै C) पठनाय D) शयनाय

7. धेनुः माता ....।(स्मरणम्–सुलभम्)

A) भारः B) परमशिवा C) विक्रेयपशुः D) दुग्धदायिनी

8. प्रतिदिनं प्रातः..................... क्रियते।(स्मरणम्–सुलभम्)

A) रामकथानकं B) गीताभ्यासः C) शिवगुणगानं D) वन्दनं

9. दीपनुतिः खलु .... परा।(स्मरणम्–सुलभम्)

A) मित्र B) शत्रू C) सेवक D) बाल

10. अत्र .... एव भाग्यविधायकम् अस्ति।(स्मरणम्–सुलभम्)

A) दैवम् B) निजार्जितकर्म C) मन्त्रः D) समयः

11. श्रमः ....जनयति।(स्मरणम्–सुलभम्)

A) दुःखम् B) क्लेशम् C) श्रियम् D) निर्बलता

12. कविवाणी त्यागधनानां तपोनिधीनां .... (स्मरणम्–सुलभम्)

A) लज्जां जनयति B) विस्मारयति C) गाथां गायति D) उपहासं करोति

13. ज्ञानं गङ्गाजलम् इव ....भवति । (स्मरणम्–सुलभम्)

A) अशुद्धम् B) क्षणिकम् C) नित्यनिर्मलं D) जडम्

14. एषा ज्ञानं शंसति।(स्मरणम्–सुलभम्)

A) मूर्खवाणी B) यतिवाणी C) बालवाणी D) विक्रयवाणी

15. वीराणां स्वदेहविमोहः ....।(स्मरणम्–सधारणम्)

A) सदा अस्ति B) नैव अस्ति C) यदा कदा D) अपरः

16. वीराः .... भवन्ति। (स्मरणम्–सुलभम्)

A) पठनरताः B) शयनरताः C) युद्धरताः D) भोजनरताः

17. कृषकः ....जीवनसाफल्यं पश्यति।(स्मरणम्–सधारणम्)

A) विश्रामरतः B) चिन्तारतः C) कार्यरतः सन् D) सेवासक्तः

18. जीवनलक्ष्यं.......................... ।(स्मरणम्–सधारणम्)

A) भोगः B) राज्यं C) न हि धनपदवी D) यशः

19. जीवनलक्ष्यं...................... भवति। (स्मरणम्–सुलभम्)

A) युद्धम् B) परशिवपदसेवा C) द्रव्यसञ्चयः D) तर्कवितर्कः

20. त्यागधनानां.......... गाथां कविवाणी गायति ।(स्मरणम्–सुलभम्)

A) दुष्टानां B) निन्दितानां C) तपोनिधीनां D) धनाढ्यानां

21. ज्ञानं.......... भवति। (स्मरणम्–सुलभम्)

A) क्षणिकम् B) मलिनम् C) नित्यनिर्मलं D) विषमम्

22. अत्र .... नित्यं क्रियते।(स्मरणम्–सधारणम्)

A) युद्धम् B) दीपनुतिः C) हास्यम् D) मौनम्

23. ग्रामः........... इव अस्ति।(स्मरणम्–सधारणम्)

A) निर्जनवनम् B) पापवनम् C) सिद्धवनम् D) पुष्पवनम्

24. हरिमन्दिरम्..............। (स्मरणम्–सुलभम्)

A) गृहम् B) देवलयः C) अखिलशरीरम् D) वनम्

25. त्याग एव.........।(स्मरणम्–सुलभम्)

A) दुःखम् B) धनम् C) क्लेशः D) वैरम्

26. कृषकः श्रमफलरूपेण.......... पश्यति।(स्मरणम्–सधारणम्)

A) क्लेशम् B) विषादम् C) जीवनसाफल्यम् D) दारिद्र्यम्

27. जीवनस्य परं लक्ष्यं...........।(स्मरणम्–सधारणम्)

A) धनसञ्चयः B) भोगः C) परशिवपदसेवा D) प्रतियोगिता

II. एकवाक्येन उत्तरं लिखत ।

28. गङ्गाजलमिव नित्यनिर्मलं किम् ? (स्मरणम्–सुलभम्)

29. धनशक्ती किमर्थम् ? (ग्रहणम्–साधारणम्)

30. त्यागधनानां गाथां का गायति ? (ग्रहणम्–साधारणम्)

31. कृषकः किं पश्यति ? (स्मरणम्–सुलभम्)

32. मृत्तिका किमिव परिमलयुक्ता?(ग्रहणम्–साधारणम्)

33. ग्रामाः कीदृशाः सन्ति? (ग्रहणम्–साधारणम्)

34. बालाः के? (ग्रहणम्–साधारणम्)

35. शरीरम् किम्? (ग्रहणम्–साधारणम्)

36. कः क्रीडायै? (ग्रहणम्–साधारणम्)

37. परमशिवा का? (स्मरणम्–सुलभम्)

38. प्रातः कस्य गानं भवति? (ग्रहणम्–साधारणम्)

39. भाग्यविधायी किम्? (ग्रहणम्–साधारणम्)

40. श्रमः किम् अर्जयति? (ग्रहणम्–साधारणम्)

41. कविवाणी केषां गाथां गायति? (ग्रहणम्–साधारणम्)

42. ज्ञानं किमिव अस्ति? (ग्रहणम्–साधारणम्)

43. जीवनलक्ष्यं किम्? (ग्रहणम्–साधारणम्)

III. समानार्थकपदानि लिखत । (ग्रहणम्–साधारणम्)

44. मन्दिरम् **45**. वनराजः **46**. निर्मलम्

IV. संयोज्य लिखत । (ग्रहणम्–साधारणम्)

अ.	आ
47. क्रीडायै	सप्तमीविभक्तिः
48. युद्धरतानां	प्रथमाविभक्तिः
49. पदसेवा	चतुर्थीविभक्तिः
50 देशे	षष्ठीविभक्तिः

V. ससूहेतरं पदं लिखत । (ग्रहणम्–साधारणम्)

51. बालः, रामः, प्रातः, कृषकः ।

52. गाथाम्, सेवा, बाला, स्वरूपा ।

53. त्यागधनानाम्, शिवगुणगानम्, वीराणाम्, युद्धरतानाम् ।

VI. कविपरिचयं लिखत ।(स्मरणम्–सधारणम्)

54.विद्वान् जनार्दन हेगडे

VII. पद्यतात्पर्यं कन्नडभाषया संस्कृतभाषया लिखत । (अभिव्यक्तिः–साधारणम्)

55. मृदपि च चन्दनमस्मिन् देशे ग्रामो ग्रामः सिद्धवनम् ।
यत्र च बाला देवीस्वरूपा बालाः सर्वे श्रीरामाः ।।

56. हरिमन्दिरमिदमखिलशरीरम् धनशक्ती जनसेवायै
यत्र च क्रीडायै वनराजः धेनुर्माता परमशिवा ।
नित्यं प्रातः शिवगुणगानं दीपनुतिः खलु शत्रुपरा ।।

57 .भाग्यविधायि निजार्जितकर्म यत्र श्रमः श्रियमर्जयति ।
त्यागधनानां तपोनिधीनां गाथां गायति कविवाणी ।।
गङ्गाजलमिव नित्यनिर्मलं ज्ञानं शंसति यतिवाणी ।।

58, यत्र हि नैव स्वदेहविमोहः युद्धरतानां वीराणाम् यत्र हि
कृषकः कार्यरतः सन् पश्यति जीवनसाफल्यम्
जीवनलक्ष्यं न हि धनपदवी यत्र च परशिवपदसेवा ।।

9.तिङन्तः

1. उद्दिष्ठानुगुणं प्रामुख्यम्

व्याकरणपाठः तिङन्तः	स्मरणम्	धारणम्	अभिव्यक्तिः	ग्रहण	आहत्य
प्रश्नाः	१४	३	५	८	३०
अङ्काः	१४	३	१५	८	४०

2. प्रश्नानुगुणप्रामुख्यम्

क्र.संख्या	प्रश्नानाम् स्वरूपम्	प्रश्नाः	अङ्काः
1	वस्तुनिष्ठः	२५	२५
2	अतिलघूत्तरम्	–	–
3	लघूत्तरम्	५	१५

प्रश्नस्तरः

स्तरः	प्रश्नः	अङ्काः
सुलभः	१४	१४
साधारणः	११	११
कठिनः	५	१५
आहत्य	३०	४०

तिङन्तः

I.चत्वारः विकल्पाः प्रदत्ताःतेषु सूक्तं विकल्पं चित्वा क्रमाक्षरेण सह लिखत

१. क्रियापदानां मूलरूपं एवं कथ्यते ।(स्म –सु)

A) सुबन्तः **B**) तिङन्तः **C**) धातुः **D**) उपसर्गः

२. वर्तमानकाले धातोः अयं लकारः भवति (स्म –सु)

A) लङ् **B**) लट् **C**) लृट् **D**) लोट्

३. ' हसिष्यसि ' अस्य बहुवचनरूपम् इदं भवति ।(धा – सा)

A)हसिष्यामि **B**) हसिष्यथः **C**) हसिष्यन्ति **D**) हसिष्यामः

४. संस्कृतभाषायां प्रायः एतावन्तः धातवः सन्ति ।(स्म –सु)

A) २००० **B**) ३००० **C**) १००० **D**) ५०००

५. क्रियापदस्य नामान्तरम् इदं भवति । (धा–सा)

A) सुबन्तम् **B**) धातुः **C**) प्रत्ययः **D**) तिङन्तः

६. 'खेलति' एतद्धातुः भवति(स्म –सु)

A) खेल् **B**) भू **C**) पठ् **D**) शोभ्

७. वचनानि एतावन्तः सन्ति । (स्म –सु)

A) द्वे **B**) त्रीणि **C**) चत्वारि **D**) सप्त

८. लङ् लकारः एतस्मिन् कालार्थे भवति । (धा–सा)

A) लट् **B**) लङ् **C**) लोट् **D**) लृट्

९. 'कुर्वन्ति' एतद्वचनम् । (स्म –सु)

A) एक **B**) द्वि **C**) बहु **D**) त्रयोऽपि

१०. 'पुरुषाः' कति सन्ति ? (स्म –सु)

A) त्रयः **B**) चत्वारि **C**) सप्त **D**) अष्ट

II.इतर वचनद्वयम् लिखत (स्म –सु)

१. ---- पठथः -----

२. हसामि ---- -----

३. ---- ---- गच्छन्ति

४. ---- अनमताम् ----

५. ---- ----- हसथ

६. ----- शोभते ----

७. गच्छानि ---- ----

III.लकार पुरुष वचनानि लिखत (ग्र – सा)

A) गच्छामि **B)** हसन्ति **C)** खेलिष्यथ **D)** अपठम्

उ) पठावः ऊ) स्थः ऋ) अगच्छः ॠ) खेलानि

IV.सर्व पुरुष वचनेषु लिखत (अभि – क)

१. अपिबत्

२. वन्दते

३. धावति

४. भविष्यति

५. करोति

८. चतुरः कालिदासः

उद्दिष्टानुसारं प्राधान्यम्

उद्दिष्टम्	स्मरणम्	ग्रहणम्	अभिव्यक्तिः	प्रशंसा
प्रश्नसंख्या	26	17	1	3
अङ्काः	28	17	3	3

प्रश्नानुसारं प्राधान्यम्

क्रमांकः	प्रश्नस्वरूपम्	अङ्काः	प्रश्नसंख्या
१	वस्तुनिष्ठप्रश्नाः	16	16
२	लघु उत्तरम् – १ (१ अङ्कस्य प्रश्नाः)	30	30
३	लघु उत्तरम् – २ (२ अङ्कयोः प्रश्नाः)	–	–
४	दीर्घ उत्तरम् – १ (३ अङ्कानाम् प्रश्नः)	3	1

८. चतुरः कालिदासः

I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।

1. भोजः राजा अत्र आसीत्।(स्मरणम्–सुलभम्)

A) उज्जयिन्यां **B)** काशी **C)** धारानगरे **D)** अयोध्यायाम्

2. कालिदासः एषः आसीत् ।(स्मरणम्–सुलभम्)

A) गायकः **B)** कविकुलगुरुः **C)** सैनिकः **D)** वैद्यः

3. गुलु गुग्गुलु इति शब्दः अत्र उत्पन्नः।

A) नदीतटे **B)** क्रीडाङ्गणे **C)** सरोवरे **D)** नगरस्य मध्ये

4. भोजराजस्य आस्थाने एते आसन् ।(स्मरणम्–सुलभम्)

A) व्यापारीणः **B)** कवयः, पण्डिताः, गायकाः **C)** कृषकाः **D)** नर्तकाः

5. 'गुलु गुग्गुलु गुग्गुलु' इति समस्यापूर्तिः अनेन कृतम्।(स्मरणम्–सुलभम्)

A) वररुचिना **B)** कालिदासेन **C)** भासेन **D)** वामनकविना

6. भोजराजः एतदर्थं वनं गतः।(स्मरणम्–सुलभम्)

A) विश्रान्त्यर्थम् **B)** मृगयार्थम् **C)** स्नानार्थम् **D)** प्रवासार्थम्

7. कालिदासः.......... मन्दिरं प्रति गतवान्।(स्मरणम्–सुलभम्)

A) लक्ष्मीमन्दिरम् **B)** विष्णुमन्दिरम् **C)** कालीमन्दिरम् **D)** सरस्वतीमन्दिरम्

8. बालिका .... पुत्री आसीत्।(स्मरणम्–सधारणम्)

A) काञ्चनमालायाः **B)** कनकलतायाः **C)** कमलायाः **D)** कमलिनीपुत्री

11. जम्बूफलानि अत्र पतन्ति स्म।(स्मरणम्–सधारणम्)

A) तटभूमौ **B)** नदीस्नाने **C)** विमले जले **D)** अरण्ये

12. भोजराजः कविभ्यः......... ददाति स्म।(स्मरणम्–सुलभम्)

A) पुरस्कारम् **B)** पारितोषिकम् **C)** अभयदानम् **D)** वस्त्राणि

13. बालिकायाः हस्ते एतत् आसीत्।(स्मरणम्–सुलभम्)

A) पुष्पम् B) फलम् C) तालीपत्रम् D) लड्डुकः

14. क ख ग घ इत्येताः रेखाः अत्र दृष्टाः।(स्मरणम्–सुलभम्)

A) भित्तौ B) पुस्तके C) तालीपत्रे D) हस्ते

15. 'कविकुलगुरुः' इति उपाधिः अस्मै दत्तम् ।(स्मरणम्–सधारणम्)

A) भासाय B) माघाय C) कालिदासाय D) भरताय

16. बालिका तालिपत्रे............ लिखितवती आसीत्।(स्मरणम्–सुलभम्)

A) कविताम् B) चित्रम् C) वर्णान् D) श्लोकम्

II. एकवाक्येन उत्तरं लिखत ।

17.कः राजा धारानगरे आसीत्? (स्मरणम्–सुलभम्)

18. कविकुलगुरुः इति कः प्रसिद्धः आसीत् ? (स्मरणम्–सुलभम्)

19.कः कालीमन्दिरं गच्छन् आसीत्? (स्मरणम्–सुलभम्)

20.राजा मृगयार्थं कुत्र गतः? (स्मरणम्–सुलभम्)

20 कः शब्दः कपीनां क्रीडया उत्पन्नः? (ग्रहणम्–साधारणम्)

21.बालिकायाः नाम किम्? (स्मरणम्–सधारणम्)

22.बालिकायाः मातुः नाम किम्? (स्मरणम्–सुलभम्)

23.बालिकायाः हस्ते किम् आसीत्? (स्मरणम्–सधारणम्)

24.तालीपत्रे के वर्णाः आसन्? (स्मरणम्–सुलभम्)

25.राजा कालिदासाय किम् दत्तवान्? (स्मरणम्–सधारणम्)

26.धारानगरस्य राजा कः ? (स्मरणम्–सुलभम्)

III. रिक्तस्थानानि पूरयत :

27. कालिदासः..........................प्रति गच्छन् आसीत् ।(स्मरणम्–सुलभम्)

28 श्लोकं श्रुत्वा सर्वे.......................... अभवन् ।(स्मरणम्–सधारणम्)

IV. समानार्थकपदानि लिखत ।(ग्रहणम्–साधारणम्)

29. भूपालः **30.** प्रसिद्धः **31.** पण्डितः **32.** वृक्षः

V. अन्यलिङ्गपदं लिखत । (ग्रहणम्–साधारणम्)

33. सः **34.** कस्याः **35.** बालिका **36.** अन्यतमः **37.** कविः

VI. वाक्यानि रचयत । (प्रशंसा –साधारणम्)

38 आस्थाने **39** राजा **40.** क्रीडन्ति

VII. आम् / न इति लिखत ।

41.भारतदेशे बहवः भूपालाः आसन् । (ग्रहणम्–साधारणम्)

42. भोजः कलहेन कालं यापयति स्म । (ग्रहणम्–साधारणम्)

43.कालिदासः कवि कुलगुरुः इति प्रसिद्धः । (ग्रहणम्–साधारणम्)

44.एकदा भोजराजः मृगयार्थं ग्रामम् अगच्छत् । (ग्रहणम्–साधारणम्)

45.कवयः राजसभा समागत्य ऊर्ध्वमुखा: अतिष्ठन् । (ग्रहणम्–साधारणम्)

VIII. पञ्चषैः वाक्यैः मातृभाषया उत्तरं लिखत । (अभिव्यक्तिः–साधारणम्)

46. कालिदासः कविकुलगुरुः इति कथं प्रसिद्धः अभवत् इति विवृणत।

पूरकपाठौ

2. भिक्षुकस्य स्वप्नः

उद्दिष्टानुसारं प्राधान्यम्

उद्दिष्टम्	स्मरणम्	ग्रहणम्	अभिव्यक्तिः	प्रशंसा
प्रश्नसंख्या	15	7	2	3
अङ्काः	15	7	6	3

प्रश्नानुसारं प्राधान्यम्

क्रमांकः	प्रश्नस्वरूपम्	अङ्काः	प्रश्नसंख्या
१	वस्तुनिष्ठप्रश्नाः	25	25
२	लघु उत्तरम् – १ (१ अङ्कस्य प्रश्नाः)	–	–
३	लघु उत्तरम् – २ (२ अङ्कयोः प्रश्नाः)	–	–
४	दीर्घ उत्तरम् – १ (३ अङ्कानाम् प्रश्नः)	6	2

I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।

1. भिक्षुकः कुत्र वसति?(स्मरणम्–सुलभम्)

   A) नगरे **B)** ग्रामे **C)** अरण्ये **D)** मठे

2. भिक्षुकः सायं कुत्र गच्छति? (स्मरणम्–सुलभम्)

   A) गृहम् **B)** उद्यानम् **C)** धर्मशालाम् **D)** मन्दिरम्

3. भिक्षुकस्य निद्रा कीदृशी आसीत्? (ग्रहणम्–साधारणम्)

   A) भययुक्ता **B)** गहन **C)** सुखनिद्रा **D)** अल्पनिद्रा

4. भिक्षुकस्य स्वप्ने कः मरणं प्राप्नोति? (स्मरणम्–सुलभम्)

   A) सेनापतिः **B)** महाराजः **C)** मन्त्री **D)** गजः

5. भिक्षुकस्य विवाहः कया सह भविष्यति? (ग्रहणम्–साधारणम्)

   A) रक्षिका **B)** मन्त्रीपुत्र्या **C)** राजपुत्र्या **D)** गणिकया

6. विवाहे के मिलन्ति?(स्मरणम्–सुलभम्)

   A) अजनाः **B)** देवाः **C)** बान्धवाः **D)** शत्रवः

7. भिक्षुकः किं करोति जीवनाय?(ग्रहणम्–साधारणम्)

   A. कर्षणम् **B.** याचनम् **C.** वाणिज्यम् **D.** अध्ययनम्

8. भिक्षुकः धर्मशालयां किं करोति? (ग्रहणम्–साधारणम्)

   A. अध्ययनम् **B.** भोजनम् **C.** शयनम् **D.** गानम्

9. महाराजः कीदृशः आसीत् ?(स्मरणम्–सुलभम्)

   A. अपुत्रः **B.** वृद्धः **C.** दारिद्रः **D.** गायकः

10. गजाय कां दत्वा प्रेषयन्ति ।(ग्रहणम्–साधारणम्)

    A. किरीटम् **B.** मणिः **C.** मालां **D.** पत्रम्

11. गजः मालां कस्य कण्ठे अर्पयिष्यति?(स्मरणम्–सुलभम्)

A. राजपुत्रस्य **B.** सेनायाः **C.** भिक्षुकस्य **D.** मन्त्रीणाम्

12. गजः किं करिष्यति मालया सह?(स्मरणम्–सुलभम्)

A. जलं पीत्वा **B.** अटनं करिष्यति **C.** वनं गच्छति **D.** निद्रां करिष्यति

13. . जनाः किं घोषयिष्यन्ति?(स्मरणम्–सुलभम्)

A. "सः कविः अस्ति" **B.** "एषः राजगुरुः अस्ति"

C. "एषः एव महाराजः भविष्यति" **D.** "एषः वीरः अस्ति"

14. भिक्षुकं कुत्र नेष्यन्ति?(स्मरणम्–सुलभम्)

A. वनम् **B.** ग्रामम् **C.** राजभवनं **D.** विद्यालयम्

15. कः सम्प्रति महाराजः भविष्यति? (ग्रहणम्–साधारणम्)

A. सेनापतिः **B.** भिक्षुकः **C.** गजः **D.** पण्डितः

16. भिक्षुकः स्वप्ने राज्यं लब्ध्वा जीवनं कथं यापयिष्यति?(स्मरणम्–सुलभम्)

A. दुःखेन **B.** शोकदुःखयुतम् **C.** सुखेन **D.** याचनया

17. कतिपयवर्षाणाम् अनन्तरं किमर्थं सिद्धतां करिष्यन्ति? (स्मरणम्–सुलभम्)

A. गजस्य अभिषेकः **B.** महाराजस्य पुनः विवाहः

C. युद्धम् **D.** पुत्रपुत्र्याः विवाहार्थम्.

18. बान्धवानां दर्शनेन महाराजः किं अनुभवति? (स्मरणम्–सुलभम्)

A. भयम् **B.** सन्तोषम् **C.** दुःखम् **D.** क्रोधम्

19. सैनिकः किं वदति? (स्मरणम्–सुलभम्)

A. महाराजः मृतः **B.** गजः पलायितः

C. “शत्रवः युद्धार्थम् आगताः”इति **D.** पुत्रः लुप्तः

20. सैनिकः कदा आगच्छति? (स्मरणम्–सुलभम्)

A. युद्धान्ते **B.** विवाहावसरे **C.** प्रातःकाले **D.** भोजनसमये

21. सैनिकस्य वाक्यं श्रुत्वा महाराजः किं करोति? (ग्रहणम्–साधारणम्)

A. रोदिति **B.** नृत्यति

C. कोपेन आक्रन्दनं करोति **D.** सुतं प्रेषयति

22. भिक्षुकस्य जागरणं कदा भवति? (स्मरणम्–सुलभम्)

A. युद्धसमये **B.** घोषवेलायाम् **C.** आक्रन्दनसमये **D.** स्वप्नान्ते

23. जागरणानन्तरं भिक्षुकः किं पश्यति? (प्रशंसा–साधारणम्)

A. गजम् **B.** रथम् **C.** सूर्यप्रकाशम् **D.** पुत्रम्

24. भिक्षुकः जागरित्वा किं करोति? (प्रशंसा–साधारणम्)

A. पालयति **B.** शयनं करोति

C. सूर्यं नमस्कृत्य भिक्षाटनं **D.** ग्रामं त्यजति

25. स्वप्नं कस्याः विषये अस्ति? (प्रशंसा–साधारणम्)

A. जीवनस्य दुःखम् **B.** राज्यप्राप्तेः **C.** पुत्रस्य मृत्यु **D.** गजस्य युद्धम्

II. पञ्चषैः वाक्यैः कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।

1. भिक्षुकः कथं राजा अभवत् ? (अभिव्यक्तिः–साधारणम्)

2. भिक्षुकः स्वप्ने किं किं चिन्तयति ? (अभिव्यक्तिः–साधारणम्)

4 – अक्कमहादेवी

1. उद्दिष्टानुगुणं प्रामुख्यम्

पद्यम् उपनिषद्वचनम्	स्मरणम्	धारणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	15	07	02	–	24
अङ्काः	15	07	06	–	28

2. प्रश्नानुगुणप्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्काः
1	वस्तुनिष्ठः	15	15
2	अतिलघूत्तरम्	07	07
3	लघूत्तरम्	-	-
4	दीर्घोत्तरम्	02	06

3.प्रश्नस्तरः

स्तरः	प्रश्नाः	अङ्काः
सुलभः	07	07
साधारणः	15	15
कठिणः	02	06
आहत्य	24	28

I. सूक्तम् उत्तरं चित्वा लिखत ।

1. पिता – इत्यस्य अन्यलिङ्गपदम् इदम् अस्ति ।

A} माता **B**] जनकः **C**} सुतः **D**} भ्राता

2.सद्गुणः – अस्य विरुद्धार्थकपदम् इदं भवति ।

A} गुणः **B**} दुर्गुणः **C**} सुगुणः **D**} असद्गुणः

3. गृहम् – अस्य समानार्थकपदम् इदम् अस्ति ।

A} वनम् **B**} काननम् **C**} आपणम् **D**} गेहम्

4. पर्वताग्रे – अत्र अयं सन्धिः भवति ।

A} गुण **B**} वृद्धि **C**} सवर्णदीर्घ **D**} यण्

5. मनसि – अत्र इयं विभक्तिः अस्ति ।

A} प्रथमा **B**} तृतीया **C**} पञ्चमी **D**] सप्तमी

6.राजा– अस्य समानार्थकपदम् इदम् अस्ति ।

A} जनकः **B**} नृपः **C**} सचिवः **D**} पितामहः

7.तस्याः – इत्यस्य अन्यलिङ्गपदम् इदम् अस्ति ।

A} तस्य **B**} तया **C**} ताम् **D**} तस्यै

II. एकवाक्येन उत्तरम् लिखत ।

8. महादेवी कुत्र कदा अजायत?

9. महादेव्याः पितरौ कौ?

10. कः महादेवीं परिणेतुं मनश्चकार?

11. महादेव्याः पितरौ कं परिणेतुम् आदिष्टवन्तौ?

12. कौशिकः कस्य उल्लङ्घनं कृतवान्?

13. महादेवी कुत्र प्रविष्टवती?

14. महादेवी कुत्र आध्यात्मविषयान् उपदिदेश?

15. महादेवी कस्मिन् ऐक्यङ्गता ?

